।। শিবস্তুতিঃ ।।

স্ফুটং স্ফটিকসপ্রভং স্ফুটিতহাটকশ্রীজটং
শশাংকদলশেখরং কপিলফুল্লনেত্রত্রয়ম ।
তরক্ষুবরকৃত্তিমদ্ভুজগভূষণং ভূতিমত
কদা নু শিতিকংঠ তে বপুরবেক্ষতে বীক্ষণম ।। ১ ।।
ত্রিলোচন বিলোচনে লসতি তে ললামায়িতে
স্মরো নিয়মঘস্মরো নিয়মিনামভূদ্ভস্মসাত ।
স্বভক্তিলতয়া বশীকৃতবতী সতীয়ং সতি
স্বভক্তবশগো ভবানপি বশী প্রসীদ প্রভো ।। ২ ।।
মহেশ মহিতোঽসি তত্পুরুষ পূরুষাগ্র্যো ভবার্স
নঘোর রিপুঘোর তেঽনবম বামদেবাংচলিঃ ।
নমঃ সপদিজাত তে ত্বমিতি পংচরূপোঽংচিতঃ
প্রপংচয় চ পংচবৃন্মম মনস্তমস্তাড্য় ।। ৩ ।।
রসাঘনরসানলানিলবিয়দ্বিবস্বদ্বিধু স
প্রয়ষ্ট্ৃষু নিবিষ্টমিত্য়জ ভজাআমি মূর্ত্য়ষ্টকম ।
প্রশাংতমুত ভীষণং ভুবনমোহনং চেত্য়হো
বপূংষি গুণপূংষি তেঽহমহমাত্মনোঽহংভিদে ।। ৪ ।।
বিমুক্তিপরমাধ্বনাং তব ষডধ্বনামাস্পদং
পদং নিগমবেদিনো জগতি বামদেবাদয়ঃ ।
কথংচিদুপশিক্ষিতা ভগবতৈব সংবিদ্রতে
বয়ং তু বিরলাংতরাঃ কথমুমেশ তন্মন্মহে ।। ৫ ।।
কঠোরতকুঠারয়া ললিতশূলয়া বাহয়া
রণড্ঢমরয়াঅ স্ফুরদ্ধরিণয়া সখট্বাংগয়া ।
চলাভিরচলাভিরপ্য়গণিতাভিরুন্ত্ৃত্য়ত স

শ্চতুর্দশা জগংতি তে জয় জয়েত্য়য়ুর্বিস্ময়ম ।। ৬ ।।
পুরত্রিপুররংধনং বিবিধদৈত্য়বিধ্বংসনং
পরাক্রমপরংপরা অপি পরা ন তে বিস্ময়ঃ ।
অমর্ষবলহর্ষিতক্ষুভিতবৃত্তনেত্রয়ো স
জ্বলজ্বলন হেলয়া শলভিতং হি লোকত্রয়ম ।। ৭ ।।
সহস্রনয়নো গুহঃ সহসহস্ররশ্মির্বিধু স
বৃহস্পতিরুতাপ্পতিঃ সসুরসিদ্ধবিধয়াধরাঃ ।
ভবত্পদপরায়ণাঃ শ্রীয়মিমামগুঃ প্রার্থিনাং
ভবান সুরতরুর্দৃশং দিশ শিবাং শিবাবল্লভ ।। ৮ ।।
তব প্রিয়তমাদতিপ্রিয়তমং সদৈবাংতরং
পয়স্যুপহিতং ঘৃতং স্বয়মিব শ্রিয়ো বল্লভম ।
বিভিধয় লঘুবুদ্ধয়ঃ স্বপরপক্ষলক্ষায়িতং
পঠংতি হি লুঠংতি তে শঠহৃদঃ শুচা শুংঠিতাঃ ।। ৯ ।।
নিবাসনিলয়শ্চিতা তব শিরস্ততির্মালিকা
কপালমপি তে করে ত্বমশিবোঽস্য়নংতর্ধিয়াম ।
তথাঽপি ভবতঃ পদং শিব শিবেত্য়দো জল্পতাস
মকিংচন ন কিংচন বৃজিনমস্ত্য়ভস্মীভবত ।। ১০ ।।
ত্বমেব কিল কামধক সকলকামমাপূরয়ন
অপি ত্রিনয়নঃ সদা বহসি চাত্রিনেত্রোদ্ভবম ।
বিষং বিষধরান দধত পিবসি তেন চানংদবান
বিরুদ্ধচরিতোচিতা জগদধীশ তে ভিক্ষুতা ।। ১১ ।।
নমঃ শিব শিবাশিবাশিব শিবার্ধ কৃংতাশিবং
নমো হর হর হরাহরহরাংতরীং মে দৃশম ।
নমো ভব ভবাভব প্রভব ভূতয়ে সংপদাং
নমো মৃড নমো নমো নম উমেশ তুভ্য়ং নমঃ ।। ১২ ।।

সতাং শ্রবণপদ্ধতিং সরতু সত্রতোক্তেত্য়সৌ
শিবস্য় করুণংকুরাত প্রতিকৃতাত সদা সোদিতা ।
ইতি প্রথিতমানসো ব্য়ধিত নাম নারায়ণঃ
শিবস্তুতিমিমাং শিবাং লিকুচসূরিসূনুঃ সুধীঃ ।। ১৩ ।।
।। শ্রী (লিকুচ) নারায়ণপংডিতাচার্য়বিরচিতা শিবস্তুতিঃ ।।
।। ভারতীরমণমুখ্য়প্রাণাংতর্গত শ্রীকৃষ্ণার্পণমস্তু ।।
www.yousigma.com